# अर्थसंग्रहस्थानां केषांचित्पदार्थानां परिचयः :-

१. सोमयागस्य स्वरूपं :-

प्रथमदिनं - दीक्षणीयेष्टि, सायणीयेष्टि, आतिथ्येष्टि, सोमक्रयणं।

द्वितीयदिनं - उपसदिष्टि, पत्नीसंयाजादिहोमाः, सोमाभिषवणं।

इमौ प्रवर्ग्यकर्मदिवसौ।

तृतीयदिनं - औपवसथ्यदिनं - औपवसथ्यपशुयागः।

चतुर्थदिनं - सुत्यादिनं - सवनीयपशुशगः।

पंचमदिनं - अवभृत्यदिनं - दआनुबन्ध्यपशुयागः।

एते प्रधानयागदिवसाः, यत्र पशुयागाः क्रियन्ते।। तत्र प्रधानयागानां प्रथमदिवसे यजमानेन स्नात्वाऽभिसूतसोमरसं प्रातः यागमण्डपे आनयनानन्तरं प्रथमं ग्रहपात्रेषु चमसपात्रेषु
च सोमरसं गृह्यन्ते। ततः ऋग्वेदिभिः गानं विना दण्डाकारेण देवतास्तुतिपरा ऋचः पठ्यन्ते।

ततः यागः प्रवर्तते इति क्रमः।

तत्र ऋग्वेदिभिः पठिता ऋचः(शस्त्रशब्दवाच्या) एव 'प्रारनुवाकः' इत्युच्यन्ते।

२ हवनकर्मणः प्रक्रिया :-

अध्वर्युः द्रव्यं जुह्वायां गृहीत्वाऽऽग्नीध्रं प्रैषति 'आश्रावय' इति, तत आग्नीध्रः प्रतिवदति 'अस्तु श्रौषट्' इति, तदनन्तरं द्रव्यत्यागः, ततोऽध्वर्युः ब्रूते 'अनुब्रूहि' इति। ततः होता पुरोनुवाक्या पाठः क्रियते। पुना अध्वर्युरादिशति 'यज' इति, ततः याज्या मंत्राः होत्रा पठ्यन्ते। ततः होमः। तै सं १.६.११, जै मी ४.२.२२अ।।

अनूच्यतेऽनया इति अनुवाक्या, तदपि पुरः क्रियते इति 'पुरोऽनुवाक्या'। यह देवताओं के आह्वान मन्त्र होता है। इज्यतेऽनया इति 'याज्या'। यह हविः प्रदान करते समय होता द्वारा पठित मन्त्रों का नाम है।

३. मन्त्राः त्रिविधः :-

करण, क्रियमाणानुवादी, अनुमन्त्रणश्चोति। तत्र, यन्मन्त्रं पूर्वमुच्चार्य तदन्ते कर्म क्रियते स मन्त्रः 'करणमन्त्रः'। यस्य मन्त्रस्योच्चारणसमकालमेव कर्मानुष्ठीयते स 'क्रियमाणानुवादी'। यस्तु कर्मानुष्ठाननानन्तरं पठ्यते स 'अनुमन्त्रणमन्त्रः'।

४. स्तोत्रस्तोमशस्त्राणि :-

प्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं 'स्तोत्रं'। तद्गता संख्या 'स्तोम' शब्देनोच्यन्ते। अप्रगीतश्चेत् तदेव स्तोत्रं 'शस्त्रम्' इत्यभिधीयन्ते। स्तोमाश्च त्रिवृत्(९), १५, १७, २१, २४, २७, ३३, ४४, ४८ संख्याकाः भवन्ति।

५. सूक्तवाकप्रस्तरप्रहरणानि :-

यद्यपि ऋचां समूहः 'सूक्तमि'त्युच्यन्ते तथापि सूक्तवाकशब्दः योगारूढः, अतो मंत्रविशेषस्य संज्ञा भवति। सुष्ठु वक्तीति 'सूक्तवाकः'। 'सूक्तवाकेन प्रस्तरं प्रहरति'- इत्यस्मिन् विधिवाक्ये प्रथमलूनो दर्भमुष्टिः 'प्रस्तरः', वेद्यां तेषामुपरि हवींष्यासाद्यन्ते, यागान्ते च तेषामध्वर्युणाऽऽहवनीये प्रक्षेपणं 'प्रहरणं'। सूक्तवाकसमूहश्च तै ब्रा ३.५ आदिषु द्रष्टव्यः।

सूक्तवाकेषु मन्त्रेष्वेकोऽयं मन्त्रः - 'अग्निरिदं हविरि'त्यादिः। तस्यार्थः - पुरोडाशसेवया प्रवृद्धोऽप्यश्रान्तश्चाग्निः स्वस्मिन् यजमाने वा तेजो बाहुल्यं कृतवान्।



Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

६. सोमयागे विशेष: :-

ज्योष्टिोमादौ सोमयागेषु प्रधानयागदिनेषु प्रतिदिनं क्रियमाणानि सन्ति त्रीणि सवनानि यत्र द्वादशस्तोत्राणि पठ्यन्ते। त्रीणि पवमानानि, इतराणि च नव। तत्र पवमानत्रयाणां पाठत: प्राक् 'असतो मा ...' इत्यादि यजमानेन जप्यानि त्रीणि यजूंषि भवन्ति। एतज्जपकर्म 'अभ्यारोहजप' इति नाम्ना प्रसिद्ध:। द्र० बृ.उ. १/३/२८.

| | सवननाम | स्तोत्रनाम | संख्या | संख्या | स्तोमप्रकार: |
|---|---|---|---|---|---|
| १ | प्रात:सवनम् | बहिष्पवमानं | एकं | १ | त्रिवृत्सतोमकं |
| | | आज्यास्तोत्राणि | चत्वार: | ४ | पंचदशस्तोमकं |
| २ | माध्यन्दिनसवनम् | माध्यन्दिनपवमानं | एकं | १ | पंचदशस्तोमकं |
| | | पृष्ठस्तोत्राणि | चत्वार: | ४ | सप्तदशस्तोमकं |
| ३ | सायंसवनम् | आर्भवपवमानं | एकं | १ | सप्तदशस्तोमकं |
| | | यज्ञायज्ञीयं | एकं | १ | एकविंशस्तोमकं |
| | कुलस्तोत्रसंख्या | | | १२ | |



Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM